शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ॥
बलाश्वदंष्ट्राविल्वानि पाठा नागरधान्यकम् ।
एतदाहारसंयोगे हितं सर्व्वातिसारिणाम् ॥१३
विल्वचूतास्थिनिर्य्यूहः खण्डं मध्वतिसारनुत् ॥१४।
अतीसारे हितस्तद्वत् कुटजत्वक्फलाहृतः ॥१५॥
वत्सकातिविषाविल्वबालाकन्दकषायकः ।
सविश्व आमशूलाढ्य ह्यतीसारे सशोणिते ॥”१६
इति गारुड़े १७४ अध्यायः ॥
अपि च ।
“हस्तवद्धं पलाशस्य अपामार्गस्य वा हर ! ।
मूलं सर्व्वज्वरहरं भूतप्रेतादिनुद्भवेत् ॥ १७ ॥
पीतं वृश्चिकमूलन्तु पर्य्युषितजलेन वै ।
साद्धं विनाशयेद्दाहज्वरञ्च परमेश्वर ! ॥ १८ ॥
शिखायाश्चैव तद्बद्धं भवेदैकाहिकादिनुत् ।१९।
एतत् सकाञ्जिकं पीतं रक्तकुष्ठज्वरादिनुत् ॥”२०
इति तत्रैव १९३ अध्यायः ॥
“वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥२१
अभयामलकद्राक्षाः पाठा चैव विभीतकम् ।
शर्करा च समञ्चैव जग्धं ज्वरहरं भवेत् ॥”२२
इति च गारुड़े १९९ अध्यायः ॥ * ॥
वैद्यकमते शिवज्वरस्योत्पत्तिर्यथा,—
“दक्षापमानसंक्रुद्धरुद्रनिश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥
तस्य विप्रकृष्टकारणकथनपूर्व्विका सम्प्राप्तिर्यथा,
“मिथ्याहारविहारस्य दोषा ह्यामाशयाश्रयाः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥”
तस्य सामान्यलक्षणं यथा,—
“स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा ।
युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ॥”*॥
तस्य पूर्व्वरूपं यथा,—
“श्रमोऽरतिर्व्विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्द्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ॥”*॥
सन्ततादिज्वराणां प्रतिनियतदूष्या धातवो यथा,
“सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ॥
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ॥
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ॥
अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ।
कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ॥
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ।
चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ॥
जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः ॥
मध्ये व्यहनी ज्वरयत्यादावन्ते च मुञ्चति ॥”*॥
वातबलासकज्वरो यथा,—
“नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ॥”
विषमज्वरविशेषाः ।
“विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहे चार्द्धश्चोष्णं प्रजायते ॥”*॥
शीतपूर्व्वो ज्वरो यथा,—
“त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ॥”
दाहपूर्व्वो ज्वरो यथा,—
“करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ॥
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥”
उक्तवातादिज्वराणां धातुविशेषदूष्यतया अधिकलक्षणानि यथा,—
“गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यञ्चास्योपजायते ॥ १ ॥
रक्तनिष्ठीवनं दाहो मोहश्छर्द्दनविभ्रमौ ।
प्रलापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥२
पिण्डिकोद्वेष्टनं तृष्णासृष्टमूत्रपुरीषतः ।
उष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥३
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्द्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥४
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्द्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥ ५ ॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ॥६॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥”७
अथ वैद्यकमते सामान्यतो ज्वरस्य चिकित्सामाह ।
“अंशांशं यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ।
साधारणीं क्रियान्तत्र विदधीत चिकित्सकः ॥
सामान्यतो ज्वरी पूर्व्वं निर्व्वाते निलये वसेत् ।
निर्व्वातमायुषो वृद्धिमारोग्यं कुरुते यतः ॥
व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः ॥
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ॥
वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपणः ।
चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा ॥
एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः ।
नवज्वरी भवेद्यत्नाद्गुरुप्रावसनावृतः ।
यथर्त्तुपक्वं पानीयं पिबेत् किञ्चिन्निवारयन् ॥
विनापि भेषजैर्व्याधिः पथ्यादेव निवर्त्तते ।
न तु पथ्यविहीनस्य भेषजानां शतैरपि ॥” * ।
ततो ज्वरे वर्ज्जनीयान्याह सुश्रुतः ।
“परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च ।
दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलम् ॥
क्रोधप्रवातभोज्यानि वर्ज्जयेत्तरुणज्वरी ॥”
परिषेकः स्नानादिः । प्रदेहो अनुलेपनाभ्यङ्गादिः । स्नेहान् पाने निषिद्धान् ॥ * ॥
निषिद्धानिषेधाद्दोषमाह ।
“शोषं छर्द्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम् ।
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात् ॥”
आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ * ॥
हारीतेन प्रत्येकं दूषणमुक्तम् ।
“व्यायामाज्ज्वरसंवृद्धिर्व्यवायात् स्तम्भमूर्च्छनम् ।
मृतिश्च स्नेहपानात्तु मूर्च्छा छर्द्दिर्मदोऽरुचिः ॥
गुर्व्वन्नभोजनात् स्वप्नाद्विष्टम्भो दोषकोपनम् ।
अग्निसादः खरत्वञ्च स्रोतसां चाप्रवर्त्तनम् ॥”
मृतिरिति व्यवायादित्यत्र सम्बध्यते । स्वप्नात् दिवास्वापात् ॥ * ॥ अन्यच्च वर्ज्जयेत् ।
“सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च ।
असात्म्यान्यन्नपानानि विरुद्धाध्यशनानि च ॥
व्यायामभतिचेष्टाश्चाभ्यङ्गं स्नानञ्च वर्ज्जयेत् ।
तेन ज्वरः शमं याति न शान्तश्च पुनर्भवेत् ॥
ज्वरी लङ्घनं कुर्य्यादिति चरकः वाग्भटश्च ।”
“आमाशयस्थो हत्वाग्निं सामो मार्गं पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥”
अस्यायमर्थः । “यस्मो हेतोः आमाशयस्थो दोषो वातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निं हत्वा आच्छाद्य सामः अपक्वाहारयहितोमार्गं रसमार्गं पिधापयन् । अत्रार्थत्वाद्हेतावपि कर्त्तरीन् । तेन पिदधदित्यर्थः । ज्वरं करोति तस्माद्धेतोर्ज्वरी लङ्घनमाचरेदित्यर्थः ॥ * ॥
“त्रिविधं त्रिविधे दोषे तत् समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ।
प्रभूते शोधनं तच्च मूलादुन्मूलयेन्मलान् ॥”
चक्रश्च ।
“तरुणन्तु ज्वरं पूर्व्वं लङ्घनेन क्षयं नयेत् ।
आमदोषमलिङ्गाढ्या लङ्घयीत यथाविधि ॥”
अन्यच्च ।
“ज्वरादौ लङ्घनं कुर्य्यात् ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते रेचनं कुर्य्यात् कोष्ठशुद्ध्यै यथाबलम् ॥
दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च ।
लङ्घितश्चाल्पदोषश्च यवागूपानमाचरेत् ।
शालिषष्टिकमुद्गानां यूषं वा शक्तमाहरेत् ।
पञ्चकोलेन संसिद्धा यवागूर्मध्यलङ्घने ॥
अतिलङ्घितश्च तं दृष्ट्वा तस्य सन्तर्पणं हितम् ।
द्राक्षादाड़िमखर्ज्जूरपियालैः सपरूषकैः ॥
तर्पणार्हे तु कर्त्तव्यं तर्पणं ज्वरशान्तये ॥”
अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः ।
“आनद्धस्तिमितैर्दोषैर्य्यावन्तं कालमातुरः ।
तावत्त्वनशनं कुर्य्यात्ततः संसर्गमाचरेत् ॥”
आनद्धस्तिमितैर्दोषैर्निश्चलैर्दोषैः सम्बद्धः ।
संसर्गं औषधान्नादिप्रसङ्गम् ॥ * ॥
यत्तु चरक आह ।
“चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ॥”
चतुःप्रकारा संशुद्धिः वमनविरेचननिरूहवस्ति-